अभ्युदीयतेऽनेन करणे अच् । ३आशास्यमानचूड़ादिसंस्कारे च । अत एव तदर्थकश्राद्धम् आभ्युदयिकमित्युच्यते । ४अभ्युदयसाधने इष्टलाभे ५वृद्धिनिमित्तके श्राद्धे च "सम्पन्नमित्यभ्युदये दैवे रुचितमित्यपि" मनुः । "अभ्युदये वृद्धिश्राद्धे" कुल्लू० । "प्रतिषेद्धाऽपि चेद्या तु मद्यमभ्युदयेष्वपि" मनुः । भावे अच् । ६उत्तरोत्तरवृद्धौ "अभ्युदयफलं धर्मज्ञानमिति" शा०भा० "धर्मः श्रेयः समुद्दिष्टं श्रेयोऽभ्युदयसाधनमिति" भवि०पु० । अभ्युदयः इष्टलाभादि प्रयोजनमस्य ठञ् । अभ्युदयनिमित्ते श्राद्धे । "अथाभ्युदयिके श्राद्धे युग्मानाशयेत्" गोभि० "अभ्युदयः इष्टलाभः विवाहादि तदर्थं श्राद्धम् आभ्युयिकम् तच्च भूतभविष्यद्भेदेन द्विविधम् भूतं पुत्रजन्मादि भविष्यत् विवाहादि श्रा०त० रघुनन्दनः ।

**अभ्युदयार्थक** न० अभ्युदयः इष्टलाभादि अर्थो निमित्तं यस्य । अभ्युदयनिमित्ते श्राद्धे "नैमित्तिकमथो वक्ष्ये श्राद्धमभ्युदयार्थकम्" मार्क० पु० ।

**अभ्युदानयन** न० अभि+उद्+आ+नी—ल्युट् । अग्नेरभिमुखानयने "अभ्युदानयन्" गो०सू० अभ्युदानयन् अग्नेरभिमुखमानयन् जपेदिति स०त० रघुनन्दनव्याख्यानात् तदुपसृष्टस्य नयतेः तथार्थत्वम् ।

**अभ्युदाहरण** न० अभि+उद्+आ+हृ—ल्युट् । १ अभिमुखकथने २आभिमुख्येनोर्द्ध्वमुत्क्षेपणे च ।

**अभ्युदित** त्रि० अभितः सर्व्वतः उदितमुत्क्रान्तं प्रातर्विहितं कर्म यस्मात् । सूर्य्योदयकाले निद्रयाऽकृततत्कालकर्त्तव्ये १ब्रह्मचारिणि । "सूर्य्येण ह्यभिनिर्मुक्तः शयानोऽभ्युदितश्च यः" मनुः । २अभितउदिते, ३ प्रकाशिते च त्रि० "माघे मासि रटन्त्यापः किञ्चिदभ्युदिते रवौ" म०त०पुरा० । [भावे क्त कथने न० ।

**अभ्युदीरित** त्रि० अभि—उद्+ईर—क्त । अभिमुखमुक्ते ।

**अभ्युद्गम** पु० अभि+उद्+गम—भावे अप् । १ अभ्युत्थाने २ उद्भवे च । ल्युट् । अभ्युद्गमनमप्यत्र न० ।

**अभ्युद्यत** त्रि० अभि+उद्+यम—क्त । उद्युक्ते "कुलमभ्युद्यतनूतनेश्वरम्" रघुः । १अयाचितोपनीते फलादौ, "एधोदकं मूलफलमन्नमभ्युद्यतञ्च यत्" मनुः ।

**अभ्युद्धृत** त्रि० अभि+उद्+हृ—क्त । १अयाचितोपनीते २अभ्यर्थ्य दत्ते च "एधोदकं मूलफलमन्नमभ्युद्धृतञ्च यत्" शु०त० मनुवचनपाठः "अभ्यर्थ्य दत्तमिति व्याख्यातं च रघुनन्दनेन । अभि+उद्+धृ—क्त । २आभिमुख्येनोत्तोलनेन धृते ।

**अभ्युन्नत** त्रि० आभिमुख्येन उन्नतः । आभिमुख्येन उन्नते अत्यन्तोन्नते । "अभ्युन्नताङ्गुष्ठनखप्रभाभिः" कुमा० ।

**अभ्युपगत** त्रि० अभि+उप+गम—क्त । १स्वीकृते अङ्गीकृते । २ समीपगते ३अभिमुखमुपगते च ।

**अभ्युपगम** पु० अभि+उप+गम—अप् । १स्वीकारे "क्रियाभ्युपगमात्त्वेतद्बीजार्थं यत् प्रदीयते" मनुः । २समीपगतौ च १ "नियमदयादीक्षाभ्युपगमेत्यादि" सुश्रुतः ।

**अभ्युपपत्ति** स्त्री अभि+उप+पद—क्तिन् । अनिष्टनिवारणपूर्व्वकाभीष्टसम्पादनरूपे अनुग्रहे, "ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकमिति" "स्त्रीविप्राभ्युपपत्तौ च घ्नन् धर्मेण न दुष्यति" "स्त्रीबालाभ्युपपत्तौ च वाह्यानां सिद्धिकारणम्" इति च मनुः अभ्युपपूर्व्वपद्यतेः सान्त्वनानुग्रहार्थत्वेनैव "रतिमभ्युपपत्तुमातुरामिति" कु०प्रयोगः । २ सान्त्वने च

**अभ्युपपत्तुम्** अव्य० अभि+उप+पद—तुमुन् । सान्त्वयितुम् अनुग्रहीतुं वेत्यर्थे "रतिमभ्युपपत्तुमातुराम्" कुमा० ।

**अभ्युपपन्न** त्रि० अभि+उप+पद—क्त । अनुगृहीते ।

**अभ्युपाय** पु० अभि+उप+इण्—अच् । १ स्वीकारे २ अधिकोपाये च । "तस्मिन् सुराणां विजयाभ्युपाये" कुमा० "तान् वोऽभ्युपायान् वक्ष्यामि" मनुः ।

**अभ्युपेत** त्रि० अभि+उप+इण—क्त । १अभिमुखसमीपगते २अङ्गीकृते ३ अङ्गीकर्त्तरि च ।

**अभ्युपेत्य** त्रि० अभि+उप+इण—कर्मणि क्यप् । अभिमुखं समीपगम्ये । ल्यप् । स्वीकृत्वेत्यर्थे अव्य० । "अभ्युपेत्य च शुश्रूषामिति" नार० ।

**अभ्युपेत्याशुश्रूषा** स्त्री अभ्युपेत्य अङ्गीकृत्य अशुश्रुषाऽसेवनम् । अङ्गीकृत्य पश्चात् दास्याकरणरूपे विवादभेदे "अभ्युपेत्य च शुश्रूषां यस्तां न प्रतिपद्यते । अशुश्रूषाभ्युपेत्यैतद्विवादपदमुच्यते" नार० । "आज्ञाकरणं शुश्रूषा तामङ्गीकृत्य पश्चाद्यो न सम्पादयति तद्विवादपदमभ्युपेत्याशुश्रूषाख्यमिति" मिताक्षरा ।

**अभ्युपेत्या** स्त्री अभि+उप+इण—भावे क्यप् । सेवायाम् ।

**अभ्युषित** त्रि० अभि+वस—क्त । १अभिमुखमुषिते अभिमुखस्थिते सेवकादौ पु० ।

**अभ्यु(भ्यू)ष** पु० अभित उ(ऊ)ष्यते अग्निना दह्यते अभि+ऊ(ऊ)ष—बा० कर्मणि क । १ यवगोधूमादिचूर्णकृते (रोटि) प्रसिद्धे दग्धान्नभेदे । ऊष भावे कर्म्मणि वा घञ् । वह्निना ईषद्दग्धेऽन्ने हेम० भावे घञ् । कलायादेरीषद्दहने अभि+उष—भावादौ घञ् । अभ्योषोऽप्यत्र अभ्यु(भ्यूभ्यो)षायहितं छ यतौ अभ्यू(भ्यु)(भ्यो)षीयम् अभ्यू(भ्यु)(भ्यो)-